लघुसिद्धान्तकौमुदी
अथ शैषिकाः

1068. शेषे (4-2-91) ॥अधिकारसूत्रं विधिसूत्रं च ॥

अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राणादयः स्युः।

चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदिपिष्टा दार्षदाः सक्तवः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। 'तस्य विकारः' इत्यतः प्राक् शेषाधिकारः।

1068. **शेष इति** – 'शेषे' इत्यस्य अधिकारे ये प्रत्ययाः विहितास्ते शैषिकाः कथ्यन्ते। इतःपरं ये प्रत्ययाः वक्ष्यन्ते, ते शेषेऽर्थे ज्ञेयाः। शेषोऽर्थः क इति जिज्ञासायामुच्यते-अपत्यादि-चतुरर्थ्यन्तादिति। अपत्यार्थतः चातुरर्थिकान्तं यावदुक्ताः प्रत्यया अपत्यादिचतुरर्थ्यन्ताः प्रत्ययास्तेभ्य अन्योऽर्थः = इतरोऽर्थो व्याकरणशास्त्रे 'शेष' इति कथ्यते। तस्य विकार इत्यतः प्राक् शेषाधिकारः।

रूपसिद्धिः

चाक्षुषम् (रूपम्) – चक्षुषा गृह्यते इत्यर्थे चक्षुष्शब्दात् "शेषे" इत्यण् प्रत्ययेऽनुबन्धलोपे, चक्षुष् अ इति जाते, "तद्धितेष्वचामादेः" इत्यादिवृद्धौ, स्वादिकार्ये (सौ सोरमि पूर्वरूपे) चाक्षुषमिति रूपं सिद्धम्।

श्रावणः (शब्दः) –श्र ावणेनग ृह्यतेइ त्यर्थेश्र ावणशब्दात्' 'शेषे''इ त्यणि,अ नुबन्धलोपे,श्र ावणअ इ तिज ाते, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'श्रावणः' इति रूपं सिद्धम्।

औपनिषदः (पुरुषः) – उपनिषद्भिः प्रतिपादितः पुरुषः इत्यर्थे 'शेषे' इत्यण् प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, स्वादिकार्ये "औपनिषदः" इति रूपं सिद्धम्।

चातुरम् (शकटम्) – चतुर्भिरुह्यते इत्यर्थे (अश्वैः पुरुषैर्वा) अण् प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, स्वादिकार्ये 'चातुरम्' इति सिद्धम्।

चातुर्दशम् (रक्षः) – चतुर्दश्यां दृश्यते चतुर्दशीशब्दात् "शेषे" इत्यण्-प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादीकारलोपे, नपुंसके स्वादिकार्ये 'चातुर्दशम्' इति रूपं सिद्धम्।

शैशिकार्थानां कानिचन अन्योदाहरणानि यथा –

1. अश्वैरुह्यते- आश्वो रथः (काशिका)।
2. स्मृतिभिरुपदिष्टः – स्मार्तो धर्मः।
3. ब्रह्म जानाति – ब्राह्मणः ['अन्' इति प्रकृतिभावः]।
4. वितरणेन (दानेन) लङ्घ्यते – वैतरणी नदी।
5. चक्षुषोर्गोचरः – चाक्षुषः विषयः।
6. श्रुतौ विहितम् – श्रौतं कर्म।

1069. **राष्ट्राऽवारपाराद् घखौ (4-2-92) ॥विधिसूत्रम् ॥**

आभ्यां क्रमाद् घ-खौ स्त: शेषे। राष्ट्रे जातादि: - राष्ट्रिय:। अवारपारीण:।

(वा.) **अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्।**

अवारीण:। पारीण:। पारावारीण:।

1070. **ग्रामाद् य-खञौ (4-2-93) ॥विधिसूत्रम् ॥**

ग्राम्य:। ग्रामीण:।

1069. **राष्ट्राऽवारपारादिति** - राष्ट्राऽवारपारात्, घखौ इतिच्छेद:। राष्ट्रञ्च अवारपारञ्च राष्ट्राऽवारपारम्, तस्मात् = राष्ट्रावारपारात्। समाहारद्वन्द्व:। घश्च खश्च घखौ। इतरेतरद्वन्द्व:। **राष्ट्रशब्दात् अवारपारशब्दाच्च शेषेऽर्थे जात:, भव: इत्याद्यर्थे यथासंख्यपरिभाषया क्रमश: घप्रत्यय: खप्रत्यय: च स्याताम्।** यथा राष्ट्रिय:। अवारं च पारं च अवारपारम्, अवारपारे जात: भव: वा अवारपारीण:।

रूपसिद्धि:

राष्ट्रिय: - राष्ट्रे जात: भवो वेत्यर्थे ''राष्ट्राऽवारपाराद् घखौ'' इति घप्रत्यये, ''आयनेयीनीयिय: फढखछघां प्रत्ययादीनाम्'' इति सूत्रेण घस्य स्थाने इयादेशे राष्ट्र इय् अ इति जाते, भत्वादकारालोपे, राष्ट्रिय इति जाते, विभक्तिकार्ये 'राष्ट्रिय:' इति रूपं सिद्धम्।

अवारपारीण: - अवारपारे जात: भवो वेत्यर्थे ''राष्ट्राऽवारपाराद् घखौ'' इति सूत्रेण खप्रत्यये, ''आयनेयीनीयिय: फढखछघां प्रत्ययादीनाम्'' इति खस्य ईनादेशे अवारपार ईन् अ इति जाते, ''यचिभम्'' इति भसञ्ज्ञायां, ''यस्येति च'' इति अकारलोपे अवारपार् ईन् अ इति जाते, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, स्वादिकार्ये 'अवारपारीण:' इति रूपं सिद्धम्।

(वा.) **अवारपारादिति** - अवारपारात्, विगृहीतात्, अपि, विपरीतात्, च, इति, वक्तव्यम् इतिच्छेद:। **अवारपारशब्दाद् पृथग्भूताद् विपरीताच्च खप्रत्यय: स्यादिति वक्तव्यम् इत्यर्थ:।** यथा- विगृहीतात् = अवारीण:, पारीण:। विपरीतात् = पारावारीण:।

रूपसिद्धि:

अवारीण: - अवारे भवो जातो वेत्यर्थे अवारशब्दात् ''अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्'' इति वार्तिकसहयोगेन ''राष्ट्राऽवारपाराद्घखौ'' इति ख प्रत्यये, खस्य ईनादेशे भत्वादकारलोपे णत्वे, स्वादिकार्ये 'अवारीण:' इति रूपं सिद्धम्।

पारीण: - पारे जातो भवो वेत्यर्थे पारशब्दात् खप्रत्यये, ''आयनेयीनीयिय: फढखछघां प्रत्ययादीनाम्'' इति खस्य ईनादेशे पार ईन् अ इति जाते, भत्वादकारलोपे, नस्य णत्वे, स्वादिकार्ये 'पारीण:' इति रूपं सिद्धम्।

पारावारीण: - पारावारे भवो जातो वा इत्यर्थे पारावारशब्दात् ''अवारपाराद् विगृहीतादपि विपरीताच्चेति वक्तव्यम्'' इति वार्तिकसहयोगेन ''राष्ट्राऽवारपाराद् घखौ'' इति खप्रत्यये, खस्य ईनादेशे, पारावार ईन् अ इति जाते, भत्वादकारलोपे, नस्य णत्वे, स्वादिकार्ये 'पारावारीण:' इति रूपं सिद्धम्।

1070. **ग्रामादिति** - ग्रामात्, यखञौ इतिच्छेद:। यश्च खञ् च य-खञौ, इतरेतरद्वन्द्व:। खञि ञकारोऽनुबन्ध:। **सप्तम्यन्तसमर्थाद् ग्राम-शब्दाद् जातो भवो वेत्यादिविशेषेऽर्थे यप्रत्यय: खञ्प्रत्ययश्च भवत इत्यर्थ:।** यथा- ग्राम्य:। ग्रामीण:।

रूपसिद्धि:

ग्राम्य: - ग्रामे जातो भवो वेत्यर्थे ''ग्रामाद्यखञौ'' इति सूत्रेण यप्रत्यये, भत्वादकारलोपे स्वादिकार्ये 'ग्राम्य:' इति रूपं सिद्धम्।

ग्रामीण: - ग्रामे जातो भवो वेत्यर्थे ''ग्रामाद्यखञौ'' इति खञ्प्रत्ययेऽनुबन्धलोपे ग्राम ख इति जाते, आदिवृद्धौ, खस्य ईनादेशे ग्राम ईन् अ इति जाते, भत्वादकारलोपे ग्राम् ईन् अ इति जाते, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, स्वादिकार्ये 'ग्रामीण:' इति रूपं सिद्धम्।

071. **नद्यादिभ्यो ढक् (4-2-96) ॥विधिसूत्रम् ॥**

नादेयम्। माहेयम्। वाराणसेयम्।

1072. **दक्षिणा-पश्चात्पुरसस्त्यक् (4-2-97) ॥विधिसूत्रम् ॥**

दाक्षिणात्य:। पाश्चात्त्य:। पौरस्त्य:।

1071. **नद्यादिभ्यइति** - नद्यादिभ्य:, ढक् इतिच्छेद:। नदी (नदीशब्द:) आदिर्येषान्ते नद्यादय:, तेभ्य: = नद्यादिभ्य:, तद्गुणसंविज्ञानबहुव्रीहि:। **नद्यादिगणपठितसुबन्तप्रातिपदिकेभ्य: शैषिकार्थेषु (जाताद्यर्थेषु) ढक्प्रत्यय: स्यादित्यर्थ:।** यथा- नादेयम्। माहेयम्। वाराणसेयम्। नद्यादिगणो यथा- नदी। मही। वाराणसी। श्रावस्ती। कौशाम्बी। वनकौशाम्बी (नवकौशाम्बी इति काशिका)। काशपरी (काशफरी इति काशिका)। खादिरी। पूर्वनगरी। पूर्। वन। गिरि। पाठा (पाठा इति काशिकायाम्)। माया (मावा इति काशिका)। शाल्वा (साल्वा इति काशिका)। दार्वा। दाल्वा। सेतकी (वासेनकी इति काशिका)। वडवाया वृषे (गणसूत्रम्)। शरावती (शब्द कौस्तुभे एव नान्यत्र)।

रूपसिद्धि:

नादेयम् - नद्यां जातं भवं वेत्यर्थे नदीशब्दात् ''नद्यादिभ्यो ढक्'' इति सूत्रेण ढक्-प्रत्ययेऽनुबन्धलोपे, नदी ढ इति जाते ''आयनेयीनीयिय: फढखछघां प्रत्ययादीनाम्'' इति सूत्रेण ढस्य एयादेशे नदी एय् अ इति जाते, ''किति च'' इति आदिवृद्धौ नादी एय् अ इति जाते, भत्वाद् ''यस्येति च'' इति ईकारलोपे नाद् एय् अ इति जाते, नपुंसकलिङ्गे स्वादिकार्ये 'नादेयम्' इति रूपं सिद्धम्।

माहेयम् - मह्यां जातं भवं वेत्यर्थे महीशब्दात् ''नद्यादिभ्यो ढक्'' इति सूत्रेण ढक्प्रत्ययेऽनुबन्धलोपे, ढस्य एयादेशे मही एय् अ इति जाते, आदिवृद्धौ माही एय् अ इति जाते, भत्वादीकारालोपे माहेय इति जाते, स्वादिकार्ये 'माहेयम्' इति रूपं सिद्धम्।

वाराणसेयम् - वाराणस्यां जातं भवं वेत्यर्थे वाराणसीशब्दात् ''नद्यादिभ्यो ढक्'' इति ढक्प्रत्ययेऽनुबन्धलोपे, वाराणसी ढ इति जाते, ढस्य एयादेशे, ''किति च'' इति आकारस्य आकारे आदिवृद्धौ, भत्वादीकारालोपे वाराणस् एय् अ इति जाते, स्वादिकार्ये 'वाराणसेयम्' इति रूपं सिद्धम्।

अन्योदाहरणानि यथा -

वने जाता भवा वा वानेया: पादपा:।

कौशाम्ब्यां जातो भवो वा कौशाम्बेयो जन:।

पुरि जातो भवो वा पौरेय:। अथवा पूर्निवासोऽस्य पौरेय:।

गिरौ जातं भवं वा गैरेयम् ('गेरू' इति भाषायाम्)

1072. **दक्षिणेति** - दक्षिणा-पश्चात्-पुरस:, त्यक् इतिच्छेद:। दक्षिणा च पश्चात् च पुरश्च दक्षिणापश्चात्पुर:, तस्मात् = दक्षिणापश्चात्पुरस:, समाहारद्वन्द्व:। पश्चात् पुरस् इति अव्ययाभ्यां साहचर्यात् 'दक्षिणा' इति आजन्त-अव्ययमेव गृह्यते टाबन्तं न। **दक्षिणाप श्चात्प ुरसइ त्येभ्य:श ब्देभ्योज ाताद्यर्थेत यक्-प्रत्यय:स यादित्यर्थ:।** यथा- दाक्षिणात्य:। पाश्चात्त्य:। पौरस्त्य:।

रूपसिद्धि:

दाक्षिणात्य: - दक्षिणा जातो भवो वेत्यर्थे 'दक्षिणा' इत्यव्ययात् (दक्षिणदिशि जातो भवो वा) ''दक्षिणापश्चात् पुरसस्त्यक्'' इति त्यक्-प्रत्ययेऽनुबन्धलोपे दक्षिणा त्य इति जाते, ''किति च'' इत्यादिवृद्धौ दाक्षिणा त्य इति जाते, स्वादिकार्ये 'दाक्षिणात्य:' इति रूपं सिद्धम्।

पाश्चात्त्य: - पश्चात् जातो भवो वा इत्यर्थे 'पश्चात्' इत्यव्ययात् त्यक्-प्रत्ययेऽनुबन्धलोपे, कित्त्वादादिवृद्धौ, स्वादिकार्ये 'पाश्चात्य:' इति रूपं सिद्धम्।

पौरस्त्य: - पुरो जातो भवो वेत्यर्थे पुरस्शब्दात् त्यक्-प्रत्ययेऽनुबन्धलोपे, पुरस् त्य इति जाते, कित्त्वादादिवृद्धौ, स्वादिकार्ये 'पौरस्त्य:' इति रूपं सिद्धम्।

1073. द्यु-प्रागपागुदक् प्रतीचो यत्(4-2-100) ॥विधिसूत्रम् ॥

दिव्यम्। प्राच्यम्। अवाच्यम्। उदीच्यम्। प्रतीच्यम्।

1073. **द्युप्रागिति** - द्यु-प्राग्-अपाग्-उदक्-प्रतीचः, यत् इतिच्छेदः। द्यौश्च प्राङ् च अपाङ् च उदङ् च प्रत्यङ् च द्युप्रागपागुदक्प्रत्यक्, तस्मात् = द्युप्रागपागुदक्प्रतीचः, समाहारद्वन्द्वः। **दिव्, प्राञ्च् अपाञ्च्, उदञ्च्, प्रत्यञ्च् एभ्यः सप्तम्यन्त-समर्थ-प्रातिपदिकेभ्यः जाताद्यर्थे यत्प्रत्ययः स्यात्।** यथा- दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्।

रूपसिद्धिः

दिव्यम् - दिवि (स्वर्गे) जातं भवं वेत्यर्थे दिव्शब्दात् ''द्युप्रागपागुदक् प्रतीचो यत्'' इति सूत्रेण यत्-प्रत्ययेऽनुबन्धलोपे, दिव् य इति जाते, विभक्तिकार्ये 'दिव्यम्' इति रूपं सिद्धम्।

प्राच्यम् - प्राचि (पूर्वदिशायाम्) भवं वेत्यर्थे 'प्र' पूर्वकाद अञ्च् धातोः ''ऋत्विग्दधृक्.'' इत्यादिना क्विनि, सर्वापहारलोपे, प्र अञ्च् इत्यस्माद् ''द्युप्रागपागुदक् प्रतीचो यत्'' इति यत्-प्रत्ययेऽनुबन्धलोपे प्र अञ्च् य इति जाते, ''अनिदितां हल उपधायाः क्ङिति'' इति नलोपे प्र अच् य इति जाते, ''अचः'' इति अकारलोपे प्र च् य इति जाते, ''चौ'' इति पूर्वस्य अणः दीर्घे प्राच् य इति जाते, स्वादिकार्ये 'प्राच्यम्' इति रूपं सिद्धम्।

अपाच्यम् - अपाचि (दक्षिणदिशायाम्) जातं भवं वेत्यर्थे 'अप' पूर्वकाद् अञ्च् धातोः क्विनि सर्वापहारलोपे अप अञ्च् इति जाते, ''द्युप्रागपागुदक् प्रतीचो यत्'' इति सूत्रेण यत्-प्रत्ययेऽनुबन्धलोपे, अप अञ्च् य इति जाते, नलोपे अप अच् य इति जाते, ''अचः'' इति अकारलोपे अप च् य इति जाते, ''चौ'' इति पूर्वस्य अणः दीर्घे अपाच्य इति जाते, स्वादिकार्ये 'अपाच्यम्' इति रूपं सिद्धम्।

उदीच्यम् - उदीचि (उत्तरदिशायाम्) जातं भवं वेत्यर्थे 'उद्' उपसर्गपूर्वकाद् अञ्च् धातोः क्विनि सर्वापहारलोपे उद् अञ्च् इति जाते, यत्प्रत्ययेऽनुबन्धलोपे, उद् अञ्च् इति जाते, यत्-प्रत्ययेऽनुबन्धलोपे, उद् अञ्च् य इति जाते, नलोपे, उद् अच् य इति जाते, ''उद ईत्'' इति सूत्रेण अच इत्यकारस्य ईत्वे उद् ईच् य इति जाते, स्वादिकार्ये 'उदीच्यम्' इति रूपं सिद्धम्।

प्रतीच्यम् - प्रतीचि (पश्चिमदिशायाम्) जातं भवं वेत्यर्थे 'प्रति' पूर्वकाद् अञ्च्-धातो क्विनि सर्वापहारलोपे, यत्-प्रत्ययेऽनुबन्धलोपे, प्रति अञ्च् य इति जाते, नलोपे ''अचः'' इत्यकारलोपे, प्रति च् य इति जाते, ''चौ'' इति सूत्रेण पूर्वस्य अणः (इकारस्य) दीर्घे प्रतीच् य इति जाते, स्वादिकार्ये 'प्रतीच्यम्' इति रूपं सिद्धम्।

1074. अव्ययात् त्यप् (4-2-103) ॥ विधिसूत्रम् ॥

(वा.) **अमेह-क्व-तसि-त्रेभ्य एव।**

अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः।

(वा.) **त्यब्नेर्ध्रुव इति वक्तव्यम्।**

नित्यः।

1075. वृद्धिर्यस्याचामादिस्तद् वृद्धम् (1-1-72) ॥ सङ्ज्ञासूत्रम् ॥

यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद् वृद्धसङ्ज्ञं स्यात्।

1076. त्यदादीनि च (1-1-73) ॥ सङ्ज्ञासूत्रम् ॥

वृद्धसङ्ज्ञानि स्युः।

1074. **अव्ययादिति** - अव्ययात्, त्यप् इतिच्छेदः। **अव्ययेभ्यो जाताद्यर्थे त्यप्-प्रत्ययः स्यादित्यर्थः।**

(वा.) **अमेहेति** - अमा-इह-क्व-तसि-त्रेभ्यः, एव इतिच्छेदः। अमा इह क्व तसि त्र इत्येतेभ्य एव अव्ययेभ्यः शेषे त्यप्-प्रत्ययः स्यादित्यर्थः। यथा अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः।

रूपसिद्धिः

अमात्यः - अमा = समीपे सह वा भवः इत्यर्थे (अमा भवः - अमात्यः मन्त्री) 'अमा' इत्यव्ययात् "अमेहक्वतसित्रेभ्य एव" इति वार्तिक-सहयोगेन "अव्ययात्त्यप्" इति सूत्रेण त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'अमात्यः' इति रूपं सिद्धम्।

इहत्यः - इह (अत्र) भव इह जातो वा इत्यर्थे 'इह' इति अव्ययात् त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'इहत्यः' इति रूपं सिद्धम्।

क्वत्यः - क्व (कुत्र) भवो जातो वेत्यर्थे 'क्व' इत्यव्ययात् त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'क्वत्यः' इति रूपं सिद्धम्।

ततस्त्यः - तत आगत इत्यर्थे तसिप्रत्ययान्त-ततस् इति अव्ययात् त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'ततस्त्यः' इति रूपं सिद्धम्।

तत्रत्यः - तत्र भव इत्यर्थे त्रप्रत्ययान्त- 'तत्र' इत्यव्ययात्, त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'तत्रत्यः' इति रूपं सिद्धम्।

(वा.) **त्यब्नेर्ध्रुव इति**- 'नि' इत्यव्ययात् ध्रुवेऽर्थे त्यप् स्यादित्यर्थः।

रूपसिद्धिः

नित्यः - नि = नियतम् = सर्वकालेषु भवो नित्यः। 'नि' इत्यव्ययात् "त्यब्नेर्ध्रुव इति वक्तव्यम्" इति वार्तिकेन त्यप्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये, 'नित्यः' इति रूपं सिद्धम्।

1075. **वृद्धिर्यस्याचामिति** - वृद्धिः, यस्य अचाम्, आदिः, तद्, वृद्धम् इतिच्छेदः। 'वृद्धिरादैच्' इत्यनुसारम् आत् (आ) ऐच् (ऐ, औ) वर्णाः वृद्धिसङ्ज्ञकाः। **यस्य समुदायस्य अचां मध्ये आदिरच् वृद्धिसङ्ज्ञकः आ ऐ औ वा अस्ति, तस्य समुदायस्य वृद्धसङ्ज्ञा भवतीत्याशयः।**

1076. **त्यदादीनि चेति - त्यदादिगणपठितशब्दाः वृद्धसङ्ज्ञकाः स्युरित्यर्थः।** सर्वादिगणान्तर्गतः त्यदादिगणः। त्यदादिगणो यथा - त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्। त्यद् आदिर्येषां तानि त्यदादीनि, तद्गुणसंविज्ञान-बहुव्रीहिः।

1077. वृद्धाच्छः (4-2-113) ॥विधिसूत्रम् ॥

शालीयः। मालीयः। तदीयः।

(वा.) **वा नामधेयस्य वृद्धसञ्ज्ञा वक्तव्या।** देवदत्तीयः। दैवदत्तः।

1078. गहादिभ्यश्च (4-2-137) ॥विधिसूत्रम् ॥

गहीयः।

1077. **वृद्धाच्छ इति** - वृद्धात्, छः इतिच्छेदः। **वृद्धसञ्ज्ञक-सुबन्त-प्रातिपदिकेभ्यः शैषिकश्छप्रत्ययः स्यादित्यर्थः।** यथा- शालीयः। मालीयः। तदीयः।

रूपसिद्धिः

शालीयः - शालायां जातो भवो वेत्यर्थे शालाशब्दाद् ''वृद्धिर्यस्याचामादिस्तद् वृद्धम्'' इति शालाशब्दस्य वृद्धसञ्ज्ञायां, ''वृद्धाच्छः'' इति छप्रत्यये, शाला छ इति जाते, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति छस्य ईयादेशे, शाला ईय् अ इति जाते, भत्वादाकारलोपे शालीय इति जाते, स्वादिकार्ये 'शालीयः' इति रूपं सिद्धम्।

मालीयः - मालायां भव मालाया अयं वेत्यर्थे, ''वृद्धिर्यस्याचामादिस्तद्वृद्धम्'' इति ''वृद्धसञ्ज्ञायां'', ''वृद्धाच्छः'' इति छप्रत्यये, 'छ्' इत्यस्य ईयादेशे माला ईय् अ इति जाते, भत्वादाकारलोपे, स्वादिकार्ये, 'मालीयः' इति रूपं सिद्धम्।

तदीयः - तस्माज्जातः तस्यायमित्यर्थे तद्शब्दात् ''त्यदादीनि च'' इति तदः वृद्धसञ्ज्ञायां ''वृद्धाच्छः'' इति छप्रत्यये, छ् इत्यस्य ईयादेशे दद् ईय् अ इति जाते, स्वादिकार्ये 'तदीयः' इति रूपं सिद्धम्।

(वा.) **वा नामधेयस्येति** - कस्यचिद् नाम्नः वृद्धसञ्ज्ञा विकल्पेन वाच्या इत्यर्थः। यथा देवदत्तीयः। दैवदत्तः।

रूपसिद्धिः

देवदत्तीयः, दैवदत्तः - देवदत्तस्य अयमित्यर्थे देवदत्तशब्दात् ''वा नामधेयस्य वृद्धसञ्ज्ञा वक्तव्या'' इति वार्तिकेन विकल्पेन वृद्धसञ्ज्ञायां, ''वृद्धाच्छः'' इति सूत्रेण छप्रत्यये, छस्य ईयादेशे, भत्वादकारलोपे 'देवदत्तीयः' इति रूपं सिद्धम्। वृद्धसञ्ज्ञाया अभावपक्षे ''तस्येदम्'' इत्यण्-प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये, 'दैवदत्तः' इति रूपं सिद्धम्।

इत्थमेव - यज्ञदत्तस्यायं यज्ञदत्तीयो याज्ञदत्तो वा छात्रः। इत्यादयः।

1078. **गहादिभ्य इति** - गहादिभ्यः, च इतिच्छेदः। गहः (गहशब्दः) आदिर्येषां ते गहादयः, तेभ्य = गहादिभ्यः, तद्गुणसंविज्ञानबहुव्रीहिसमासः। **गहादिगणपठित-सुबन्त-प्रातिपदिकेभ्य शैषिकार्थेषु (भवाद्यर्थे) छप्रत्यय स्यादित्यर्थः।** यथा गहीयः। गहादिगणो यथा- गह। अन्तःस्थ। सम। विषम। मध्य मध्यमं चाण् चरणे (गणसूत्रम्)। उत्तम। अङ्ग। वङ्ग। मगध। पूर्वपक्ष। अपरपक्ष। अधमशाख। उत्तमशाख। एकशाख। समानशाख। समानग्राम। एकग्राम। एकवृक्ष। एकपलाश। इष्वग्र। इष्वनीक (इष्वनी इति काशिका)। अवस्यन्दनः (अवस्कन्द, काशिका)। कामप्रस्थ। खाडायन। काठेरणि। लावेरणि। सौमित्रि। शैशिरि। आसुत्। देवशर्मन् (दैवशर्मि) श्रौति। आहिंसि। आमित्रि। व्याडि। बैजि (बैदजि इति काशिका)। शौङ्गि। आध्यश्वि। आनृशंसि। अग्निशर्मन् (आग्शिर्मि)। भौजि। वाराटकी।(आराटकिक ाशिका) ।व ाल्मीकि(वाल्मिकि) ।क्ष ेमवृद्धिन्(क्षेमबुद्धि) ।अ ाश्वत्थि ।अ ौद्ग्राहमानि (औद्गाहमानि)। ऐक। विन्दवि। दन्ताग्र। हंस। तन्त्वग्र (तत्त्वग्र)। उत्तर। अन्तर (अनन्तर)। मुखपार्श्वतसोर्लोपः (गणसूत्रम्)। जनपरयोः कुक् च (गणसूत्रम्)। देवस्य च (गणसूत्रम्)। स्वस्य च (गणसूत्रम्)। वेणुकादिभ्यश्छण् (गणसूत्रम्)। आकृतिगणः। अस्य गणस्य अनेके पाठभेदाः प्राप्यन्ते।

रूपसिद्धिः

गहीयः - गहे (गुहायां) भवो गहीयः। गहशब्दात् ''गहादिभ्यश्च'' इति छप्रत्यये, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति छ् स्थाने ईय् इत्यादेशे गह ईय् अ इति जाते, भत्वादकारलोपे गहीय इति जाते, स्वादिकार्ये 'गहीयः' इति रूपं सिद्धम्। इत्थमेव अन्तःस्थेषु भव अन्तः स्थीयः। समे भवः समादागतो वा समीयः। विषमे भवो विषमाद् आगतो वा विषमीयः। अङ्गेषु भवम् अङ्गीयम्। बङ्गेषु भवं बङ्गीयम् इत्यादयः।

1079. युष्मदस्मदोरन्यतरस्यां खञ् च (4-3-1) ॥विधिसूत्रम् ॥

चाच्छः। पक्षेऽण्। युवयोर्युष्माकं वाऽयं युष्मदीयः। अस्मदीयः।

1080. तस्मिन्नणि च युष्माकास्मौ (4-3-2) ॥विधिसूत्रम्॥

युष्मदस्मदोरेतावादेशौ स्त खञि अणि च परे। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः।

1079. **युष्मदस्मदोरिति** - युष्मदस्मदोः (पञ्चम्यर्थे षष्ठी), अन्यतरस्याम्, खञ्, च इत्यव्ययम् इतिच्छेदः। चकारेण 'गर्तोत्तरपदाच्छः' इति छः प्रत्ययः समुच्चीयते। **युष्मदस्मद्भ्यां जाताद्यर्थेषु शैषिकः खञ्-प्रत्ययः स्यात्, चकारात् छप्रत्ययश्च विकल्पेन भवति। पक्षे सामान्यप्राप्तः अण्-प्रत्ययोऽपि स्यात् इत्यर्थः।**

रूपसिद्धिः

युष्मदीयः - युवयोर्युष्माकं वाऽयम् इत्यर्थे ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इति सूत्रेण छप्रत्यये, छस्य ईयादेशे, युष्मद् ईय् अ इति जाते, स्वादिकार्ये 'युष्मदीयः' इति रूपं सिद्धम्।

अस्मदीयः - आवयोरस्माकं वेत्यर्थेऽस्मद्शब्दात् ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इति छप्रत्यये, ईयादेशे, स्वादिकार्ये 'अस्मदीयः' इति रूपं सिद्धम्।

1080. **तस्मिन्नणि चेति** - तस्मिन्, अणि, च इत्यव्ययम्, युष्माकास्माकौ इतिच्छेदः। युष्माकश्च अस्माकश्च युष्माकास्माकौ, इतरेतरद्वन्द्वः। **युष्मदस्मदोः स्थाने क्रमशः युष्माकास्माकौ आदेशौ भवतः खञि अणि च परे।** यथा युष्मदस्मदोः खञि-यौष्माकीणः, आस्माकीनः। अणि-यौष्माकः, आस्माकः।

रूपसिद्धिः

यौष्माकीणः - युवयोर्युष्माकं वा अयम् इत्यर्थे युष्मद् शब्दात् ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इति सूत्रेण खञ्-प्रत्ययेऽनुबन्धलोपे, ''तस्मिन्नणि च युष्माकास्माकौ'' इति सूत्रेण 'युष्मद्' इत्यस्य स्थाने 'युष्माक' इति सर्वादेशे युष्माक ख इति जाते, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति सूत्रेण ख्-स्थाने ईन्-आदेशे, युष्माक ईन् अ इति जाते, आदिवृद्धौ, भत्वादकारलोपे, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, स्वादिकार्ये ''यौष्माकीणः'' इति रूपं सिद्धम्।

आस्माकीनः - आवयोरस्माकं वाऽयम् इत्यर्थे अस्मद्शब्दात् ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इति खञ्-प्रत्यये, अनुबन्धलोपे, अस्मद् ख इति जाते, ''तस्मिन्नणि च युष्माकास्माकौ'' इति सूत्रेण अस्मदः स्थाने 'अस्माक' इति सर्वादेशे अस्माक ख इति जाते, भत्वादकारलोपे 'आस्माकीनः' इति रूपं सिद्धम्।

यौष्माकः - युवयोर्युष्माकं वाऽयम् इत्यर्थे युष्मद्शब्दात् ''शेषे'' इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे, युष्मद् इति जाते, ''तस्मिन्नणि च युष्माकास्माकौ'' इति युष्मदः युष्माकादेशे, युष्माक अ इति जाते, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'यौष्माकः' इति रूपं सिद्धम्।

आस्माकः - आवयोरस्माकं वाऽयम् इत्यर्थे अस्मद्शब्दात् अण्-प्रत्ययेऽनुबन्धलोपे, अस्मद् अ इति जाते, अस्मद्शब्दस्य अस्माकादेशे अस्माक अ इति जाते, आदिवृद्धौ, भत्वादकारलोपे आस्माक् अ इति जाते, स्वादिकार्ये 'आस्माकः' इति रूपं सिद्धम्।

1081. **तवकममकावेकवचने (4-3-3) ॥ विधिसूत्रम् ॥** एकार्थवाचिनोर्युष्मदस्मादोस्तवकममकौ स्तः खञि अणि च। तावकीनः। मामकीनः। तावकः। मामकः। छे तु-

1082. **प्रत्ययोत्तरपदयोश्च (7-3-95) ॥ विधिसूत्रम् ॥** मपर्यन्तयोरेकार्थवाचिनोर्युष्मदस्मदोस्त्वमौ स्तः प्रत्यये उत्तरपदे च परतः। त्वदीयः। मदीयः। त्वत्पुत्रः। मत्पुत्रः।

1083. **मध्यान्मः (4-3-5) ॥ विधिसूत्रम् ॥** मध्यमः।

1081. **तवकममकाविति** - तवक-ममकौ, एकवचने, इतिच्छेदः। एकस्य वचनम् (उक्तिः), एकवचनम्, तस्मिन् = एकवचने। षष्ठीतत्पुरुषः। तवकश्च ममकश्च तवकममकौ। इतरेतरद्वन्द्वः। **एकार्थवाचकयोः युष्मदस्मच्छब्दयोः क्रमशः तवक, ममक इत्यादेशौ भवतः खञि परे अणि परे च।** यथा तावकीनः, तावकः इत्यादि।

रूपसिद्धिः

तावकः - तवायमित्यर्थे युष्मद्शब्दात् ''युष्मदस्मदोरन्यतरस्यां खञ्च '' इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे, युष्मद् अ इति जाते, ''तवकममकावेकवचने'' इति सूत्रेण युष्मद् इत्यस्य स्थाने 'तवक' इत्यादेशे तवक अ इति जाते, णित्वादादिवृद्धौ, भत्वादकारलोपे तावक् अ इति जाते, स्वादिकार्ये 'तावकः' इति रूपं सिद्धम्।

तावकीनः - तवायमित्यर्थे युष्मद्शब्दात् खञ्-प्रत्ययेऽनुबन्धलोपे, तवकादेशे, तवक ख इति जाते, खस्य ईनादेशे, तवक ईन् अ इति जाते, ''तद्धितेष्वचामादेः'' इति अकारस्य आकारे आदिवृद्धौ तावक ईन इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'तावकीनः' इति रूपं सिद्धम्।

मामकीनः - ममायमित्यर्थे अस्मद्शब्दात् खञ्-प्रत्ययेऽनुबन्धलोपे, ममकादेशे, ममक ख इति जाते, खस्य ईनादेशे, ममक ईन् अ इति जाते, आदिवृद्धौ, मामक ईन् अ इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'मामकीनः' इति रूपं सिद्धम्।

मामकः - ममायमित्यर्थे अस्मद्शब्दात् अण्-प्रत्ययेऽनुबन्धलोपे, अस्मद् अ इति जाते अस्मदः ममकादेशे, ममक अ इति जाते, णित्वादादिवृद्धौ, भत्वादकारलोपे मामक् अ इति जाते, स्वादिकार्ये 'मामकः' इति रूपं सिद्धम्।

1082. **प्रत्योत्तरपदयोरिति** - प्रत्ययोत्तरपदयोः, च (इत्यव्ययम्) इतिच्छेदः। प्रत्ययश्च उत्तरपदं च प्रत्ययोत्तरपदे, तयोः = प्रत्ययोत्तरपदयोः, इतरेतरद्वन्द्वः। एकस्य वचनम् एकवचनम्, तस्मिन् = एकवचने, षष्ठीतत्पुरुषः त्वश्च मश्च त्वमौ, इतरेतरद्वन्द्वः। **एकार्थवाचिनोर्युष्मदस्मदोः मपर्यन्तयोः त्वमौ इत्यादेशौ भवतः प्रत्यये उत्तरपदे च परतः।** यथा- त्वदीयः। मदीयः। त्वत्पुत्रः। मत्पुत्रः।

रूपसिद्धिः

त्वदीयः - तवायमित्यर्थे युष्मद्शब्दात् ''युष्मदस्मदोरन्यतरस्यां खञ् च'' इति छप्रत्यये, युष्मद् छ इति जाते, ''प्रत्ययोत्तरपदयोश्च'' इति युष्म् इत्यस्य स्थाने 'त्व' इत्यादेशे त्व अद् छ इति जाते, ''अतो गुणे'' इति पररूपे त्वद् छ इति जाते, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति सूत्रेण छस्य ईयादेशे त्वद् ईय् अ इति जाते, स्वादिकार्ये 'त्वदीयः' इति रूपं सिद्धम्।

मदीयः - ममायमित्यर्थे छप्रत्यये, अस्म्-स्थाने 'म' इत्यादेशे म अद् छ इति जाते, पररूपे, मद् छ इति जाते, छस्य ईयादेशे मद् ईय् अ इति जाते, स्वादिकार्ये 'मदीयः' इति रूपं सिद्धम्।

त्वत्पुत्रः - 'तव पुत्रः' इति विग्रहे ''षष्ठी'' इति षष्ठीतत्पुरुषसमासे, सुब्लुकि युष्मद् पुत्र इति जाते, ''प्रत्ययोत्तरपदयोश्च'' इति युष्म्-स्थाने 'त्व' इत्यादेशे त्व अद् पुत्र इति जाते, ''अतो गुणे'' इति पररूपे, ''खरि च'' इति दस्य तकारे चर्त्वे, स्वादिकार्ये 'त्वत्पुत्रः' इति रूपं सिद्धम्।

मत्पुत्रः - 'मम पुत्रः' इति विग्रहे, षष्ठीतत्पुरुषसमासे, सुब्लुकि, अस्मद् पुत्र इति जाते, अस्म्-स्थाने 'म' इत्यादेशे, पररूपे मद् पुत्र इति जाते, दस्य तत्वे चर्त्वे मत्पुत्र इति जाते, स्वादिकार्ये 'मत्पुत्रः' इति रूपं सिद्धम्।

1083. **मध्यान्म इति** - मध्यात्, मः इतिच्छेदः। **'मध्ये भवः' इत्याद्यर्थे मध्यशब्दाच्छैषिको मप्रत्ययो भवतीत्यर्थः।** यथा मध्यमः।

रूपसिद्धिः

मध्यमः- मध्ये भवो मध्यमः। मध्यशब्दात् ''मध्यान्मः'' इति सूत्रेण मप्रत्यये, स्वादिकार्ये 'मध्यमः' इति रूपं सिद्धम्।

1084. **कालाट्ठञ् (4-3-8) ॥विधिसूत्रम्॥** कालवाचिभ्यष्ठञ् स्यात्। कालिकम्। मासिकम्। सांवत्सरिकम्। (वा.) **अव्ययानां भमात्रे टिलोपः।** सायम्प्रातिकः। पौनः पुनिकः।

1084. **कालाट्ठञिति** – कालात्, ठञ् इतिच्छेदः। इह 'काल' इत्यनेन कालशब्द एव केवलं न गृह्यते अपि तु तत्पर्यायाः मासादयोऽपि कालविशेषवाचकाः गृह्यन्ते। **कालवाचकेभ्यो भवाद्यर्थेषु शैषिकष्ठञ् स्यादित्यर्थः।** यथा कालिकम् इत्यादयः।

रूपसिद्धिः

कालिकम्ः – काले भवमित्यर्थे कालशब्दात् ''कालाट्ठञ्'' इति ठञ्-प्रत्ययेऽनुबन्धलोपे, काल ठ इति जाते, ''ठस्येकः'' इति ठस्य 'इक' इत्यादेशे, काल इक इति जाते, ''पर्जन्यवल्लक्षणप्रवृत्तिः'' इति न्यायेन आकारस्यापि आदिवृद्धौ आकारे, भत्वादकारलोपे, स्वादिकार्ये 'कालिकम्' इति रूपं सिद्धम्।

मासिकम् – मासे भवमित्यर्थे मासशब्दात् ठञ्-प्रत्ययेऽनुबन्धलोपे मास ठ इति जाते, ठस्य इक इत्यादेशे, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'मासिकम्' इति रूपं सिद्धम्।

सांवत्सरिकम् – संवत्सरे भवं जातं वेत्यर्थे संवत्सरशब्दात् ठञ्-प्रत्ययेऽनुबन्धलोपे, ठस्य इकादेशे, संवत्सर इक इति जाते, आदिवृद्धौ, सांवत्सर इक इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'सांवत्सरिकम्' इति रूपं सिद्धम्।

अन्योदाहरणानि –

1. समये भवो जातो वा सामयिको विचारः। सामयिकी चर्चा।
2. दिवसे भवं जातं वा दैवसिकं कर्म।
3. दिने भवं जातं वा दैनिकं कृत्यम्।
4. अर्धमासे भवं जातं वा अर्धमासिकं वेतनम्।
5. शर्वर्यां भवं जातं वा शार्वरिकं तमः।
6. उषसि भवं जातं वा औषसिकं विहरणम्।
7. अह्नि भवं जातं वा आह्निकं कृत्यम्।
8. प्रस्थाने (प्रस्थानकाले) भवं प्रास्थानिकं स्वस्त्ययनम्।
9. पूर्वस्मिन् (पूर्वजन्मनि) भवा पौर्विकी जातिः।
10. पर्वणि भवः पार्विकः शर्वरीश्वरः।
11. वर्षे भवा वार्षिकी परीक्षा।
12. पक्षे भवा पाक्षिकी परीक्षा।
13. सप्ताहे भवा साप्ताहिकी परीक्षा।

(वा.) **अव्ययानामिति** अव्ययानाम्, भमात्रे, टिलोपः इतिच्छेदः। **अव्ययवाचिपदानां टेर्लोपः भसंज्ञायां सर्वत्र स्यादिति।** यथा– सायं च प्रातः च सायं प्रातः, द्वन्द्वसमासः। सायं प्रातर्भवः सायंप्रातिकः। पुनः पुनर्भवः पौनः पुनिकः।

रूपसिद्धिः

सायम्प्रातिकः – 'सायं प्रातर्भवः' इत्यर्थे सायंप्रातर् इति कालवाचकाव्ययात् ''कालाट्ठञ्'' इति ठञ्-प्रत्ययेऽनुबन्धलोपे सायंप्रातर् ठ इति जाते, ''ठस्येकः'' इति ठस्य इकादेशे सायं प्रातर् इक इति जाते, आदिवृद्धौ, सायं प्रातर् इक इति जाते, ''यचि भम्'' इति भसंज्ञायाम् ''अव्ययानां भमात्रे टिलोपः'' इति वार्तिकेन टि (अर्)- लोपे, सायं प्रातिक इति जाते, स्वादिकार्ये 'सायम्प्रातिकः' इति रूपं सिद्धम्।

पौनः पुनिकः – 'पुनः पुनर्भवः' इत्यर्थे पुनः पुनर् इति अव्ययात् ठञ्-प्रत्ययेऽनुबन्धलोपे पुनः पुनर् ठ इति जाते, ठस्य इकादेशे, पुनः पुनर् इक इति जाते, आदिवृद्धौ, पौनः पुनर् इक इति जाते, भत्वाद् ''अव्ययानां भमात्रे टिलोपः'' इति टिलोपे पौनः पुन् इक इति जाते, स्वादिकार्ये 'पौनः पुनिकः' इति रूपं सिद्धम्।

अस्य वार्तिकस्य अन्योदाहरणान्यथा –

1. 'उपरिष्टाद्भवः' औपरिष्टः। 'तत्र भवः' इत्यण्।
2. पुरस्ताद् भवः पौरस्तः। 'तत्र भवः' इत्यण्।
3. परस्ताद् भवः पारस्तः। 'तत्र भवः' इत्यण्।
4. उत्तराहि भवः औत्तराहः। 'तत्र भवः' इत्यण्।

1085. प्रावृष एण्यः (4-3-17) ॥ विधिसूत्रम् ॥

प्रावृषेण्यः।

1086. सायं-चिर-प्राह्णे-प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च (4-3-23) ॥ विधिसूत्रम् ॥

सायमित्यादिभ्यश्चतुर्भ्यः, अव्ययेभ्यश्च कालवाचिभ्यष्ट्यु-ट्युलौ स्तस्तयोस्तुट् च। सायन्तनम्। चिरन्तनम्। 'प्राह्णे' 'प्रगे' अनयोरेदन्तत्वं निपात्यते। प्राह्णेतनम्। प्रगेतनम्। (अव्ययेभ्यः) दोषातनम्।

1085. **प्रावृष एण्य इति** - प्रावृषः, एण्यः इतिच्छेदः। कालवाचिनः 'प्रावृष्' इति सुबन्तप्रातिपदिकात् भवाद्यर्थे एण्यप्रत्ययः स्यादित्यर्थः। यथा- प्रावृषेण्यः।

रूपसिद्धिः

प्रावृषेण्यः - 'प्रावृषि भवः' इत्यर्थे वर्षर्तुवाचकात् 'प्रावृष्' इति स्त्रीलिङ्गशब्दात् ''प्रावृष एण्यः'' इति सूत्रेण 'एण्य' इति प्रत्यये, प्रावृष् एण्य इति जाते, स्वादिकार्ये 'प्रावृषेण्यः' इति रूपं सिद्धम्।

1086. **सायचि रमिति** - सायं चिरं प्राह्णेप्रगेऽव्ययेभ्यः, ट्युट्युलौ, तुट्, च इतिच्छेदः। सायं च चिरं च प्राह्णे च प्रगे च अव्ययानि च सायंचिरंप्राह्णेप्रगेऽव्ययानि, तेभ्यः = सायं चिरं प्राह्णेप्रगेऽव्ययेभ्यः, इतरेतरद्वन्द्वः। ट्युश्च ट्युल् च ट्युट्युलौ, इतरेतरद्वन्द्वः। **कालवाचिभ्यः सायम्, चिरम्, प्राह्णे, प्रगे एभ्य अव्ययेभ्यश्च ट्युट्युलौ प्रत्ययौ स्तः, तयोस्तुडागमश्च स्यादित्यर्थः।** सायम् चिरम् इत्यनयो मान्तत्वं निपात्यते। प्राह्णः सोढोऽस्येति विग्रहे प्राह्णशब्दः, प्रगच्छतीति प्रगः, अनयो एदन्तत्वं निपात्यते। स्वरभेदार्थं ट्युल्-प्रत्यये लित्-करणं ज्ञेयम्।

रूपसिद्धिः

सायन्तनम् - सायं (सायंकाले) भवमित्यर्थे सप्तम्यन्त-घाऽन्त-सायशब्दात् ''सायंचिरं प्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'' इति सूत्रेण ट्यु अथवा ट्युल्-प्रत्ययेऽनुबन्धलोपे, ''युवोरनाकौ'' इति 'यु' स्थाने अनादेशे, तुडागमे, सायशब्दस्य मान्तत्वनिपातनात् ''स्वादिष्वसर्वनामस्थाने'' इति सूत्रेण पदसंज्ञायां, मस्यानुस्वारे, परसवर्णे सायन्तन इति जाते, स्वादिकार्ये 'सायन्तनम्' इति रूपं सिद्धम्।

चिरन्तनम् - चिरे (प्राचीनकाले) भवमित्यर्थे चिर शब्दात् ट्यौ ट्युलि वा प्रत्ययेऽनुबन्धलोपे, ''युवोरनाकौ'' इति युस्थाने अनादेशे, तुडागमे, चिरशब्दस्य मान्तत्वनिपातनात्, पदसंज्ञायां, मस्यानुस्वारे परसवर्णे च कृते चिरन्तन इति जाते, स्वादिकार्ये 'चिरन्तनम्' इति रूपं सिद्धम्।

प्राह्णेतनम् - प्राह्णे (पूर्वाह्णे) जातं वेत्यर्थे प्राह्णशब्दात् ट्युप्रत्यये ट्युल्प्रत्यये वा कृतेऽनुबन्धलोपे, यु स्थाने अनादेशे, तुडागमे, प्राह्णशब्दस्य एदन्तनिपातनात् स्वादिकार्ये 'प्राह्णेतनम्' इति रूपं सिद्धम्।

प्रगेतनम्- प्रगे (प्रातः काले) भवं जातं वेत्यर्थे प्रगशब्दात् ट्युप्रत्यये ट्युल्प्रत्यये वा कृते, यु स्थाने अनादेशे, तुडागमे, प्रगशब्दस्य एदन्तनिपातनात्, स्वादिकार्ये 'प्रगेतनम्' इति रूपं सिद्धम्।

दोषातनम् - दोषा (रात्रौ) भवमित्यर्थे रात्रिवाचकात् 'दोषा' इत्यव्ययात् ट्युप्रत्यये ट्युल्प्रत्यये वा कृतेऽनुबन्धलोपे दोषा यु इति जाते, यु स्थाने अनादेशे दोषा अन इति जाते, तुडागमेऽनुबन्धलोपे दोषा त् अन इति जाते, स्वादिकार्ये 'दोषातनम्' इति रूपं सिद्धम्।

अन्योदाहरणान्यथा -

1. दिवा भवं दिवातनम्।
2. श्वो भवं श्वस्तनम्।
3. ह्यो भवं ह्यस्तनम्।
4. अद्य भवम् अद्यतनम्।
5. पुरा भवं पुरातनम्।
6. सदा भवं सदातनम्। सदा भवः सदातनः।
7. सना (सदा) भवं सनातनम्। सना भवः सनातनः।
8. अधुना भवः-अधुनातनः।
9. इदानीं भवः- इदानीन्तनः।
10. प्राग् (पूर्वं) भवः प्राक्तनः।
11. प्रातर्भवः प्रातस्तनः।
12. ऐषमो भवम् (अस्मिन् वर्षे भवम्) ऐषमस्तनम्।

1087. **तत्र जातः (4-3-25) ॥विधिसूत्रम् ॥**
सप्तमीसमर्थाज्जातइ त्यर्थेऽणादयोघ ादयश्चस् युः ास्रुघ्नेज ातःस्रौघ्नः ाउ त्सेज ातअ ौत्सः ार ाष्ट्रेज ातो राष्ट्रियः। अवारपारे जातः – अवारपारीणः। इत्यादि।

1088. **प्रावृषष्ठप् (4-3-26) ॥विधिसूत्रम्॥**
एण्यापवादः। प्रावृषिकः।

1089. **प्रायभवः (4-3-39) ॥विधिसूत्रम्॥**
तत्रेत्येव। स्रुघ्ने प्रायेण = बाहुल्येन भवति–स्रौघ्नः।

1090. **सम्भूते (4-3-41) ॥विधिसूत्रम्॥**
स्रुघ्ने सम्भवति–स्रौघ्नः।

1087. **तत्र जात इति** – तत्र (तत्रेति सप्तम्यन्तानुकरणम्), जातः, इति पदच्छेदः। **सप्तम्यन्तसमर्थशब्दाद् जाताद्यर्थे अणादयः घादयश्च प्रत्ययाः भवन्तीत्यर्थः** ।य थास्रौघ्नः।अ ौत्सः।र ाष्ट्रियः।अ वारपारीणःइ त्यादि।अ णिति सामान्य प्रत्ययः, विशिष्टस्थानेषु अपवादैः बाध्यतेऽयम्।

स्रौघ्नः – 'स्रुघ्ने जातः' इत्यर्थे "तत्र जातः" इति सूत्रेण अण्–प्रत्ययेऽनुबन्धलोपे, स्रुघ्न अ इति जाते, आदिवृद्धौ, स्रौघ्न अ इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्।

औत्सः – 'उत्से (निर्झरे) जातः' इत्यर्थे (मण्डूकादयः) "तत्र जातः" इति सूत्रेण अणं प्रबाध्य "उत्सादिभ्योऽञ्" इति अञ्प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारलोपे, विशेष्यानुसारं विभक्तिकार्ये 'औत्सः' इति रूपं सिद्धम्।

राष्ट्रियः – 'राष्ट्रे जातः' इत्यर्थे अणं प्रबाध्य घप्रत्यये, "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति सूत्रेण घ् स्थाने इय् इत्यादेशे, भत्वादकारलोपे, विशेष्यानुसारं स्वादिकार्ये 'राष्ट्रियः' इति रूपं सिद्धम्।

अवारपारीणः – 'अवारपारे जातः' इत्यर्थे अणं प्रबाध्य "राष्ट्रावारपाराद् घखौ" इति खप्रत्यये, खस्य ईनादेशे, भत्वादकारलोपे, नस्य णत्वे, विशेष्यानुसारं स्वादिकार्ये 'अवारपारीणः' इति रूपं सिद्धम्।

1088. **प्रावृषष्ठविति** – प्रावृषः, ठप् इतिच्छेदः। **सप्तम्यन्तात् प्रावृष्शब्दात् जाताद्यर्थे ठप्–प्रत्ययः स्यादित्यर्थः।** प्रावृष एण्य इत्यस्यापवादः। यथा प्रावृषिकः।

रूपसिद्धिः

प्रावृषिकः – प्रावृषि जातः इत्यर्थे "प्रावृषष्ठप्" इति सूत्रेण ठप्–प्रत्ययेऽनुबन्धलोपे, प्रावृष् ठ इति जाते, "ठस्येकः" इति ठस्य इकादेशे, स्वादिकार्ये 'प्रावृषिकः' इति रूपं सिद्धम्।

1089. **प्रायभव इति** – प्रायेण (बाहुल्येन) भवतीति प्रायभवः, 'कर्तृकरणे कृता बहुलम्' इति 'तृतीयातत्पुरुषः' इति हरदत्तः। सप्तम्यन्तात् समर्थप्रातिपदिकात् 'प्रायभवः' इत्यर्थे अण्–प्रत्ययः स्यादित्यर्थः। अणिति सामान्येन भवति। पूर्वोक्त–घादयश्च अपवादत्वेन यथास्थानं प्रवृत्ताः भविष्यन्त्येव। यथा स्रौघ्नः।

रूपसिद्धिः

स्रौघ्नः – स्रुघ्ने प्रायेण (बाहुल्येन) भवतीत्यर्थे स्रुघ्नशब्दात् "प्रायभवः" इत्यणि, अनुबन्धलोपे स्रुघ्न अ इति जाते, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्। मथुरायां प्रायभवो 'माथुरः' इत्यादि।

1090. **सम्भूत इतिः** – सप्तम्यन्तात् समर्थप्रातिपदिकात् 'सम्भूते' इत्यर्थे अणादयो घादयश्च प्रत्ययाः भवन्तीत्यर्थः। अणिति सामान्येन भवति, विशिष्टस्थानेषु पूर्वोक्त–अपवादप्रत्यया एव प्रवर्तन्ते। यथा स्रौघ्नः।

रूपसिद्धिः

स्रौघ्नः – स्रुघ्ने सम्भवतीति अर्थे स्रुघ्नशब्दात् "सम्भूते" इति अण्–प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्।

1091. कोशाड्ढञ्(4-3-42) ॥विधिसूत्रम्॥

कौशेयं वस्त्रम्।

1092. तत्र भवः(4-3-53) ॥विधिसूत्रम्॥

स्रुघ्ने भवः स्रौघ्नः। औत्सः। राष्ट्रियः।

1093. दिगादिभ्यो यत्(4-3-54) ॥विधिसूत्रम्॥

दिश्यम्। वर्ग्यम्।

1091. **कोशादिति** - कोशात्, ढञ् इतिच्छेदः। **सप्तम्यन्तात् 'कोश' इति प्रातिपदिकात् सम्भूतेऽर्थे ढञ्-प्रत्ययः स्यादित्यर्थः।** ढञिति ञकारानुबन्धः आदिवृद्ध्यर्थः।

रूपसिद्धिः

कौशेयम्ः - कोशे सम्भवति इत्यर्थे कोशशब्दात् ''कोशाड्ढञ्'' इति ढञ्-प्रत्ययेऽनुबन्धलोपे, कोश ढ इति जाते, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति ढस्य एयादेशे, कोश, एय् अ इति जाते, आदिवृद्धौ, कौश एय इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'कौशेयम्' इति रूपं सिद्धम्।

1092. **तत्र भव इति** - तत्र, भवः, इतिच्छेदः। भवतीति भवः, पचादेराकृतिगणत्वादच्प्रत्ययः। **सप्तम्यन्त-समर्थ-प्रातिपदिकात् 'भव' इत्यर्थे अण्-प्रत्ययः स्यादित्यर्थः।** अण् इति सामान्यप्रत्ययः, यथासम्भवम् अपवादप्रत्ययैः बाध्यतेऽयं प्रत्ययः।

रूपसिद्धिः

स्रौघ्नः - स्रुघ्ने भव इत्यर्थे स्रुघ्नशब्दात् ''तत्र भवः'' इति अण्-प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्।

औत्सः - उत्से भव इत्यर्थे अणं प्रबाध्य ''उत्सादिभ्योऽञ्'' इति अञ्-प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारालोपे, स्वादिकार्ये 'औत्सः' इति रूपं सिद्धम्।

राष्ट्रियः - राष्ट्रे भव इत्यर्थे अणं प्रबाध्य घप्रत्यये, इयादेशे, भत्वादकारलोपे, स्वादिकार्ये 'राष्ट्रियः' इति रूपं सिद्धम्।

1093. **दिगादिभ्य इति** - दिगादिभ्यः, यत्, इतिच्छेदः। दिक् (दिश्शब्दः) आदिर्येषान्ते दिगादयः, तेभ्यः = दिगादिभ्यः। तद्गुणसंविज्ञानबहुव्रीहिसमासः। **सप्तम्यन्तसमर्थेभ्यः दिगादिगणपठितशब्देभ्यो भवार्थे यत्प्रत्ययः स्यादित्यर्थः।** सूत्रमिदं सामान्यप्राप्त-अणः छस्य चापवादः। दिगादिगणो यथा- दिश्। वर्ग। पूग। गण। पक्ष। धाय्य (धाय्या काशिकायाम्)। मित्र। मेधा। अन्तर। पथिन्। रहस्। अलीक। उखा। साक्षिन्। देश। आदि। अन्त। मुख। जघन। मेघ। यूथ। उदकात्संज्ञायाम् (गणसूत्रम्)। न्याय। वंश। वेश (विश काशिकायाम्)। काल। आकाश। अनुवंश। अप्।

रूपसिद्धिः

दिश्यम् - दिशि भवमित्यर्थे दिश्शब्दात् ''दिगादिभ्यो यत्'' इति सूत्रेण यत्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'दिश्यम्' इति रूपं सिद्धम्।

वर्ग्यम् - वर्गे भवमित्यर्थे वर्गशब्दात् ''दिगादिभ्यो यत्'' इति यत्-प्रत्ययेऽनुबन्धलोपे, भत्वादकारलोपे, स्वादिकार्ये 'वर्ग्यम्' इति रूपं सिद्धम्।

<u>अस्य अन्योदाहरणानि यथा</u> -

(1) आदौ भवः	-	आद्यः।	(2) अन्ते भवः	-	अन्त्यः।
(3) वंशे भवः	-	वंश्यः।	(4) यूथे भवः	-	यूथ्यः।
(5) पक्षे भवः	-	पक्ष्यः।	(6) गणे भवः	-	गण्यः।
(7) अन्तरे भवः	-	अन्तर्यः।	(8) रहसि भवम्	-	रहस्यम्।
(9) वने भवः	-	वन्यः।	(10) आकाशे भवः	-	आकाश्यः शब्दः।

094. **शरीरावयवाच्च (4-3-55) ॥विधिसूत्रम्॥**

दन्त्यम्। कण्ठ्यम्।

(वा.) अध्यात्मादेष्ठञिष्यते। अध्यात्मं भवम् आध्यात्मिकम्।

1094. **शरीरावयवादिति** - शरीरावयवात्, च, इतिच्छेदः। शरीरस्य अवयवः शरीरावयवः, तस्मात् = शरीरावयवात्। षष्ठीतत्पुरुषसमासः। **सप्तमीसमर्थेभ्यःश रीरावयवेभ्योभ वार्थेय त्र्स यात्।** अणोऽपवादः। यथा - दन्त्यम्। कण्ठ्यम्।

रूपसिद्धिः

दन्त्यम्ः - दन्तेषु भवं दन्त्यम्। दन्तशब्दात् ''शरीरावयवाच्च'' इति सूत्रेण यत्-प्रत्ययेऽनुबन्धलोपे, दन्त य इति जाते, ''यचिभम्'' इति भसञ्ज्ञायां, ''यस्येति च'' इति सूत्रेण भसञ्ज्ञकस्य अकारस्य लोपे, दन्त्य इति जाते, स्वादिकार्ये 'दन्त्यम्' इति रूपं सिद्धम्।

कण्ठ्यम् - कण्ठे भवं कण्ठ्यम्। कण्ठशब्दात् ''शरीरावयवाच्च'' इति यत्-प्रत्ययेऽनुबन्धलोपे, भत्वादकारलोपे, स्वादिकार्ये, 'कण्ठ्यम्' इति रूपं सिद्धम्।

(वा.) **अध्यात्मादेरिति** - अध्यात्मादेः, ठञ्, इष्यते इतिच्छेदः। अध्यात्मशब्द आदिर्यस्य सोऽध्यात्मादिः, तस्मात् = अध्यात्मादेः। तद्गुणसंविज्ञानबहुव्रीहिसमासः। **अध्यात्मादिगणपठितशब्देभ्योऽव्ययीभावेभ्य तत्र भवश्चेत्यर्थे ठञ्-स्यादित्यर्थः।** अध्यात्मादिगणे भाष्यकारेण त्रयः शब्दाः गणिताः। यथा-अध्यात्म, अधिदेव, अधिभूत। परन्तु एतान् त्रीन् शब्दान् निदर्शनार्थं मत्वा विद्वद्भिः अध्यात्मादयः आकृतिगणत्वेनाङ्गीकृताः। यत्र भवार्थे ठञ्-प्रत्ययस्य प्रयोगः स्यात् परन्तु तस्य विधायकं सूत्रं वचनं वा न स्यात्तदा सः शब्द अध्यात्मादेरन्तर्गतः बोध्यः।

रूपसिद्धिः

आध्यात्मिकम् - आत्मनि इति अध्यात्मम् (अव्ययीभावसमासः)। अध्यात्मम् (अध्यात्मे वा) भवम् इत्यर्थे अध्यात्मशब्दात् ''अध्यात्मादेष्ठञिष्यते'' इति वार्तिकेन ठञ्-प्रत्ययेऽनुबन्धलोपे, ठस्य इकादेशे, अध्यात्म इक इति जाते, ञित्वादादिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'आध्यात्मिकम्' इति रूपं सिद्धम्।

अध्यात्मादीनामन्योदाहरणनि यथा -

(1) अमुत्र भवम् आमुत्रिकम् (तत्र अर्थात् पारलौकिकम्)।

(2) इह भवम् ऐहिकम् (अत्र अर्थात् लौकिकम्)।

(3) शेषे भवाः शैषिकाः प्रत्ययाः।

(4) त्रिषु वर्णेषु भवः त्रैवर्णिको धर्मः।

(5) चतुर्षु अर्थेषु भवाः चातुरर्थिकाः प्रत्ययाः।

(6) स्वभावे भवः स्वाभाविको गुणः।

(7) स्वार्थे भवाः स्वार्थिकाः प्रत्ययाः।

(8) क्वचिद् भवं क्वाचित्कम् (इसुसुक्तान्तात्कः)।

(9) कदाचिद् भवं कादाचित्कम् (इसुसुक्तान्तात्कः)।

(10) ऊर्ध्वदेहे भवम् और्ध्वदेहिकं कर्म।

(11) समाने भवः सामानिकः।

(12) समानग्रामे भवः सामानग्रामिकः।

(13) समानदेशे भवः सामानदेशिकः।

1095. अनुशतिकादीनां च (7-3-20) ॥विधिसूत्रम्॥
एषामुभयपदवृद्धिर्ञ्रिति णिति किति च। आधिदैविकम्। आधिभौतिकम्। ऐहलौकिकम्। पारलौकिकम्। आकृतिगणोऽयम्।

1096. जिह्वामूलाङ्गुलेश्छः (4-3-62) ॥विधिसूत्रम्॥
जिह्वामूलीयम्। अङ्गुलीयम्।

1095. **अनुशतिकादीनामिति** - अनुशतिकादीनाम्, च, इतिच्छेदः। अनुशतिकः (अनुशतिकशब्दः) आदिर्येषान्ते = अनुशतिकादयः, तेषाम् = अनुशतिकादीनाम्, तद्गुणसंविज्ञानबहुव्रीहिसमासः। आदिवृद्धिप्रकरणे उत्तरपदस्य पूर्वपदस्य चेत्यधिकारे एतत्सूत्रम्। अत उक्तं **यदनुशतिकादिगणपठित-शब्देषूभयपदादिवृद्धिः स्याद् ञ्रि ति णिति किति च परे इत्याशयः।**

अनुशतिकादिगणो यथा - अनुशतिक। अनुहोड। अनुसंवरण (अनुसंचरण)। अनुसंवत्सर। अङ्गारवेणु। असिहत्य (अस्यहत्य, अस्यहेति)। वध्योग। पुष्करसद्। अनुहरत्। कुरुकत। कुरुपञ्च ाल। उदकशुद्ध। इहलोक। परलोक। सर्वलोक। सर्वपुरुष। सर्वभूमि। प्रयोग। परस्त्री। राजपुरुषात् ष्यञ्रि (गणसूत्रम्)। सूत्रनड। आकृतिगणः (तेन-अभिगम, अधिभूत, अधिदेव, चतुर्विद्या, सुखशयन, शतकुम्भ, परदर इत्यादयो गृह्यन्ते)।

रूपसिद्धिः

आधिदैविकम् - देवेषु इत्यधिदेवम्, विभक्त्यर्थेऽव्ययीभावसमासः। अधिदेवम् अधिदेवे वा भवम् इत्यर्थे अधिदेवशब्दात् ''अध्यात्मादेष्ठञ्रिष्यते'' इति वार्तिकेन ठञ्-प्रत्ययेऽनुबन्धलोपे, ठस्येकादेशे, ''अनुशतिकादीनां च'' इति सूत्रेण उभयपदयोः आदिवृद्धौ, भत्वाद् अकारलोपे, स्वादिकार्ये 'आधिदैविकम्' इति रूपं सिद्धम्।

आधिभौतिकम् - भूतेषु इत्यधिभूतम्। विभक्त्यर्थेऽव्ययीभावसमासः। अधिभूतम् (अधिभूते वा) भवम् इत्यर्थे अधिभूतशब्दात् ठञ्-प्रत्ययेऽनुबन्धलोपे, ठस्य इकादेशे, अधिभूत इक इति जाते, ''अनुशतिकादीनां च'' इत्युभयपदवृद्धौ आधिभौत इक इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'आधिभौतिकम्' इति रूपं सिद्धम्।

ऐहलौकिकम् - इहलोके भवमित्यर्थे इहलोकशब्दात् ठञ्-प्रत्यये, अनुबन्धलोपे, ठस्य इकादेशे, इहलोक इक इति जाते, उभयपदवृद्धौ, ऐहलौक इक इति जाते, भत्वादकारलोपे, ऐहलौकिक इति जाते, स्वादिकार्ये 'ऐहलौकिकम्' इति रूपं सिद्धम्।

पारलौकिकम् - परलोके भवमित्यर्थे परलोकशब्दात् ठञ्-प्रत्ययेऽनुबन्धलोपे, ठस्य इकादेशे, उभयपदवृद्धौ, भत्वादकारलोपे पारलौकिक इति जाते, स्वादिकार्ये 'पारलौकिकम्' इति रूपं सिद्धम्।

अन्योदाहरणानि यथा -
(1) प्रयोगे भवः प्रायौगिकः (अध्यात्मादित्वात् ठञ्)। (2) उदकशुद्धस्यापत्यम् औदकशौद्धिः (अत इञ् इति इञ्)।
(3) पुष्करसदोऽपत्यम्, पौष्करसादिः (बाह्वादिभ्यश्चेति इञ्)। (4) सर्वपुरुषस्येदं सार्वपौरुषम् ('तस्येदम्' इत्यण्)।
(5) सर्वभूमेरीश्वरः सार्वभौमः ('तस्येश्वरः' इत्यण्)।

1096. **जिह्वामूलेति** - जिह्वामूलाङ्गुलेः, छः, इतिच्छेदः। जिह्वामूलं च अङ्गुलिश्च जिह्वामूलाङ्गुलि, तस्मात् = जिह्वामूलाङ्गुलेः, समाहारद्वन्द्वेऽपि सौत्रं स्यादित्याशयः। तत्र भव इत्यर्थे जिह्वामूल, अङ्गुलि इत्याभ्यां शब्दाभ्यां छः स्यादित्याशयः। शरीरावयवाच्च इत्यस्यापवादः।

रूपसिद्धिः

जिह्वामूलीयम् - जिह्वामूले भवमित्यर्थे जिह्वामूलशब्दात् यतं प्रबाध्य ''जिह्वामूलाङ्गुलेश्छः'' इति छप्रत्यये, ''आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्'' इति छस्य ईयादेशे, जिह्वामूल ईय् अ इति जाते, भत्वादकारलोपे, विशेष्यानुसारं स्वादिकार्ये 'जिह्वामूलीयम्' इति रूपं सिद्धम्।

अङ्गुलीयम् - अङ्गुल्यां भवमित्यर्थे अङ्गुलिशब्दात् यत्-प्रत्ययं प्रबाध्य ''जिह्वामूलाङ्गुलेश्छः'' इति छप्रत्यये, छस्य ईयादेशे, भत्वाद् ''यस्येति च'' इति इकारलोपे स्वादिकार्ये 'अङ्गुलीयम्' इति रूपं सिद्धम्।

1097. वर्गान्ताच्च (4-3-63) ॥विधिसूत्रम्॥

कवर्गीयम्।

1098. तत आगतः (4-3-74) ॥विधिसूत्रम्॥

स्रुघ्नाद् आगतः स्रौघ्नः।

1099. ठगायस्थानेभ्यः (4-3-75) ॥विधिसूत्रम्॥

शुल्कशालाया आगतः शौल्कशालिकः।

1097. **वर्गान्ताच्चेति** - वर्गान्तात्, च, इतिच्छेदः। वर्गशब्दोऽन्तः (अन्तावयवः) यस्य स वर्गान्तः, तस्मात् = वर्गान्तात्। बहुव्रीहिसमासः। **सप्तमीसमर्थाद् वर्गशब्दान्ताद् 'भव' इत्यर्थे छप्रत्ययो भवतीत्यर्थः।** यथा कवर्गीयम्। अणोऽपवादः।

रूपसिद्धिः

कवर्गीयम् - कवर्गे भवमित्यर्थे कवर्गशब्दात् ''तत्र भवः'' इत्यण्-प्राप्ते, तं प्रबाध्य ''वर्गान्ताच्च'' इति सूत्रेण छप्रत्यये, छस्य ईयादेशे कवर्ग ईय् अ इति जाते, भत्वादकारलोपे, स्वादिकार्ये, 'कवर्गीयम्' इति रूपं सिद्धम्। एवमेव चवर्गीयम्, टवर्गीयम्, तवर्गीयम्, पवर्गीयम् इत्यादयः।

1098. **तत आगत इति** - ततः, आगतः, इतिच्छेदः। 'ततः' इति पञ्चम्यन्तनिर्देशः। **पञ्चम्यन्तात् समर्थशब्दात् 'आगत' इत्यर्थे अण्-प्रत्ययः स्यात्।** अणिति सामान्यप्रत्ययः। अस्य पूर्वोक्ता अपवादा अपि यथस्थानं प्रवृत्ताः भविष्यन्ति।

रूपसिद्धिः

स्रौघ्नः - 'स्रुघ्नाद् आगतः' (स्रुघ्नदेशादागतः) इत्यर्थे स्रुघ्नशब्दात् ''तत आगतः'' इत्यण्-प्रत्ययेऽनुबन्धलोपे, स्रुघ्न अ इति जाते, आदिवृद्धौ, स्रौघ्न अ इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्।

अस्मिन्नर्थेऽपवादा यथा -

1. राष्ट्रादागतो राष्ट्रिय (राष्ट्राऽवारपाराद् घखौ इति घः)।
2. अवारपारादागतोऽवारपारीणः (राष्ट्राऽवारपाराद् घखौ इति खः)।
3. ग्रामादागतः ग्राम्य ग्रामीणो वा (ग्रामाद् यखञौ)।
4. नद्या आगतः नादेयः (नद्यादिभ्यो ढक्)।
5. स्त्रीभ्य आगतः स्त्रैणः (स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात्)।
6. पुम्भ्य आगतः पौंस्नः (स्त्रीपुंसाभ्यां नञ् स्नञौ भवनात्)।
7. उत्सादागत औत्सः (उत्सादिभ्योऽञ्)।
8. देवादागतं दैव्यं दैवं वा (देवाद्यञञौ)।

1099. **ठगायेति** - ठक्, आयस्थानेभ्यः, इतिच्छेदः। आयस्य स्थानानि आयस्थानानि, तेभ्यः = आयस्थानेभ्यः, षष्ठीतत्पुरुषः। 'आयस्थान-वाचिभ्यः' इत्यर्थ। स्वामिना ग्रहणीयों ऽशः आय इति। स आय यस्मिन् उत्पद्यते तद् आयस्थानमिति कथ्यते। **आयस्थानवाचिभ्यष्ठक् स्यात्।** यथा शौल्कशालिकः।

रूपसिद्धिः

शौल्कशालिकः - शुल्कशालाया आगत इत्यर्थे शुल्कशालाशब्दात् ''ठगायस्थानेभ्यः'' इति सूत्रेण ठक्-प्रत्ययेऽनुबन्धलोपे, शुल्कशाला ठ् इति जाते, ''ठस्येकः'' इति ठस्य इकादेशे, शुल्कशाला इक इति जाते, ''किति च'' इति आदिवृद्धौ, शौल्कशाला इक इति जाते, भत्वादाकारलोपे, शौल्कशाल् इक इति जाते, स्वादिकार्ये 'शौल्कशालिकः' इति रूपं सिद्धम्। एवमेव आपणाद् आगत आपणिकः। आकराद् आगतः ('खान' इति भाषायाम्) आकरिकः।

1100. विद्यायोनिसम्बन्धेभ्यो वुञ् (4-3-77) ॥विधिसूत्रम्॥

औपाध्यायकः। पैतामहकः।

1101. हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः (4-3-81) ॥विधिसूत्रम्॥

समादागतं समरूप्यम्। विषमरूप्यम्। पक्षे गहादित्वाच्छः - समीयम्। विषमीयम्। देवदत्तरूप्यम्, दैवदत्तम्।

1100. **विद्यायोनीति** - विद्यायोनिसम्बन्धेभ्यः, वुञ्, इतिच्छेदः। विद्या शिक्षाग्रहणम्, योनिर्जन्म। विद्या च योनिश्च विद्यायोनी, तत्कृतः सम्बन्धो येषान्ते विद्यायोनिसम्बन्धाः, तेभ्यः = विद्यायोनिसम्बन्धेभ्यः। द्वन्द्वगर्भबहुव्रीहिसमासः। **विद्यायोनिसम्बन्धवाचिभ्यः 'तत आगत' इत्यर्थे वुञ्प्रत्ययो भवतीत्यर्थः।** यथा - औपाध्यायकः। पैतामहकः। उपाध्यायाचार्यशिष्यादयः विद्याकृतसम्बन्धवाचिनः। मातृपितृपितामहमातामहमातुलभ्रातृस्वस्रादयः योनिकृत् (जन्मकृत्) - सम्बन्धवाचिनः।

रूपसिद्धिः

औपाध्यायकः - उपाध्यायाद् आगत (ग्रन्थो विचारो वा) इत्यर्थे उपाध्यायशब्दात् ''विद्यायोनिसम्बन्धेभ्यो वुञ्'' इति वुञ्-प्रत्यये, अनुबन्धलोपे, उपाध्याय वु इति जाते, ''युवोरनाकौ'' इति 'वु' इत्यस्य स्थाने अकादेशे, आदिवृद्धौ, औपाध्याय अक इति जाते, भत्वादकारलोपे स्वादिकार्ये 'औपाध्यायकः' इति रूपं सिद्धम्।

पैतामहकः - पितामहाद् आगत इत्यर्थे पितामहशब्दात् वुञ्-प्रत्ययेऽनुबन्धलोपे, 'वु' इत्यस्य अकादेशे पितामह अक इति जाते, ''तद्धितेष्वचामादेः'' इत्यादिवृद्धौ पैतामह अक इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'पैतामहकः' इति रूपं सिद्धम्।

अन्योदाहरणान्यथा -

1. आचार्यादागत आचार्यकः (वृद्धाच्छं परत्वाद् बाधते)। 2. शिष्यादागत शैष्यकः।
3. मातुलादागतो मातुलकः। (वृद्धाच्छं परत्वाद् बाधते)।
4. मातुरागतं मातृकम्। ('ऋतष्ठञ्' इति ऋदन्तत्वाट्ठञ्)।
5. पितुरागतं पैतृकम्। ('ऋतष्ठञ्' इति ऋदन्तत्वाट्ठञ्)।
6. भ्रातुरागतं भ्रातृकम्। (ऋतष्ठञ्)।
7. स्वसुरागतं स्वासृकम्। (ऋतष्ठञ्)।
8. दुहितुरागतं दौहितृकम्। (ऋतष्ठञ्)।

1101. **हेतु-मनुष्येभ्य इति** - हेतुमनुष्येभ्यः, अन्यतरस्याम्, रूप्यः, इतिच्छेदः। हेतवश्च मनुष्याश्च हेतुमनुष्याः, तेभ्यः = हेतुमनुष्येभ्यः। इतरेतर-द्वन्द्वसमासः। **हेतुवाचकेभ्यो मनुष्यवाचकेभ्यश्च शब्देभ्यस्तत आगत इत्यर्थे विकल्पेन रूप्यप्रत्ययः स्यात्** पक्षे यथा प्राप्त-अणादयः स्युः। यथा समरूप्यम् इत्यादयः।

रूपसिद्धिः

समरूप्यम्, समीयम् - समाद् आगतम् (उचितहेतोरागतम्) इत्यर्थे हेतुवाचकात् समशब्दाद् ''हेतु मनुष्येभ्योऽन्यतरस्यां रूप्यः'' इति सूत्रेण विकल्पेन रूप्यप्रत्यये, स्वादिकार्ये 'समरूप्यम्' इति रूपं सिद्धम्। पक्षे ''गहादिभ्यश्च'' इति छप्रत्यये, छस्य ईयादेशे सम ईय् अ इति जाते, भत्वादकारलोपे समीय इति जाते, स्वादिकार्ये 'समीयम्' इति रूपम्, इत्थं 'समरूप्यम्' 'समीयम्' इति रूपद्वयं सिद्धम्।

विषमरूप्यं, विषमीयम् - विषमादागतम् इत्यर्थे विकल्पेन रूप्य प्रत्यये, स्वादिकार्ये 'विषमरूप्यम्' इति रूपम्, पक्षे छप्रत्यये, छस्य ईयादेशे, भत्वादकारलोपे, स्वादिकार्ये 'विषमीयम्' इति रूपम्, इत्थं 'विषमरूप्यम्', 'विषमीयम्' इति रूपद्वयं निष्पन्नम्।

देवदत्तरूप्यं, दैवदत्तम् - देवदत्तादागतमित्यर्थे मनुष्यवाचकाद् देवदत्तशब्दात् ''हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः'' इति विकल्पेन रूप्यप्रत्यये, स्वादिकार्ये 'देवदत्तरूप्यम्' इति रूपं पक्षे ''तत आगतः'' इत्यणि, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'दैवदत्तम्' इति रूपम्, इत्थं देवदत्तरूप्यं दैवदत्तमिति रूपद्वयं सिद्धम्।

1102. **मयट् च (4-3-82) ॥विधिसूत्रम्॥**
सममयम्। देवदत्तमयम्।

1103. **प्रभवति (4-3-83) ॥विधिसूत्रम्॥**
हिमवत: प्रभवति - हैमवती गङ्गा।

1104. **तद्गच्छति पथिदूतयो: (4-3-85) ॥विधिसूत्रम्॥**
स्रुघ्नं गच्छति स्रौघ्न:, पन्था: दूतो वा।

1105. **अभिनिष्क्रामति द्वारम्(4-3-86) ॥विधिसूत्रम्॥**
स्रुघ्नम् अभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम्।

1101. **मयट् चेति** - मयट्, च, इतिच्छेद:। **हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च तत आगत इत्यर्थे मयट्-प्रत्यय: स्यादित्यर्थ:।** यथा सममयम्। देवदत्तमयम्।

रूपसिद्धि:

सममयम् - समादागतम् (धनादिकम्) इत्यर्थे हेतुवाचकात् समशब्दात् ''मयट् च'' इति मयट्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'सममयम्' इति रूपं सिद्धम्। विषमादागतं विषममयम्।

देवदत्तमयम् - देवदत्तादागतम् इत्यर्थे देवदत्तशब्दात् ''मयट् च'' इति मयट्-प्रत्ययेऽनुबन्धलोपे, स्वादिकार्ये 'देवदत्तमयम्' इति रूपं सिद्धम्।

1103. **प्रभवतीति** - प्रभवति इति क्रियापदम्। **पञ्चम्यन्तात् 'प्रभवति' इत्यर्थे (प्रभव: = प्रथमोपलब्धि: प्रथमदर्शनं वा) अण्-प्रत्यय: स्यादित्यर्थ:।** यथा - हिमवत: प्रभवति हैमवती गङ्गा।

रूपसिद्धि:

हैमवती गङ्गा - हिमवत: प्रभवति इत्यर्थे हिमवत्-शब्दात् ''प्रभवति'' इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे, हिमवत् अ इति जाते, आदिवृद्धौ, हैमवत इति जाते, ''टिड्ढाणञ्.'' इत्यादिसूत्रेण ङीप्-प्रत्यये, अनुबन्धलोपे हैमवत ई इति जाते, भत्वादकारलोपे, स्वादिकार्ये 'हैमवती' इति रूपं सिद्धम्। इत्थमेव दरदेभ्य: प्रभवति दारदी सिन्धु: (नदी) इत्यादयोऽपि बोद्धव्या:।

1104. **तद्गच्छतीति** - तद् इति द्वितीयान्तं पदम्, गच्छति (इति क्रियापदम्), पथिदूतयो: इतिच्छेद:। पन्थाश्च दूतश्च पथिदूतौ, तयो: = पथिदूतयो:। इतरेतरद्वन्द्वसमास:। **द्वितीयान्ताद् गच्छति इत्यर्थे अण्-प्रत्यय: स्यादित्यर्थ:, गन्ता चेत् पन्था दूतो वेत्यर्थ:।** यथा स्रौघ्न:।

रूपसिद्धि:

स्रौघ्न: - स्रुघ्नं (देशविशेषं प्रति) गच्छति इत्यर्थे स्रुघ्नशब्दात् ''तद् गच्छति पथिदूतयो:'' इति सूत्रेण अण्-प्रत्ययेऽनुबन्धलोपे, स्रुघ्न अ इति जाते, णित्त्वादादिवृद्धौ, भत्वादकारलोपे स्वादिकार्ये 'स्रौघ्न:' इति रूपं सिद्धम्। एवमेव मथुरां गच्छति माथुर: पन्था: दूतो वा इत्यादयोऽपि बोद्धव्या:।

1105. **अभिनिष्क्रामति इति** - अभिनिष्क्रामति (इति क्रियापदम्), द्वारम्, इति पदच्छेद:। द्वितीयान्ताद् अभिनिष्क्रामति (उसकी ओर निकलता है, उसकी ओर जाता है इति भाषायाम्) इत्यर्थे अण्-प्रत्यय: स्वात् तच्चेत् द्वारं स्यात्। यथा स्रौघ्नं कान्यकुब्जद्वारम्।

रूपसिद्धि:

स्रौघ्नम् - स्रुघ्नम् अभिनिष्क्रामति (कान्यकुब्जद्वारम्) इत्यर्थे स्रुघ्नशब्दात् ''अभिनिष्क्रामति द्वारम्'' इत्यण्-प्रत्ययेऽनुबन्धलोपे, आदिवृद्धौ, भत्वादकारलोपे, स्वादिकार्ये 'स्रौघ्नम्' इति रूपं सिद्धम्। एवमेव मथुरामभिनिष्क्रामति माथुरं द्वारम्। राष्ट्रम् अभिनिष्क्रामति राष्ट्रियं द्वारम् (राष्ट्राऽवारपाराद् घखौ)।

1106. **अधिकृत्य कृते ग्रन्थे (4-3-87) ॥विधिसूत्रम्॥**

शारीरकम् अधिकृत्य कृतो ग्रन्थः शारीरकीयः।

1107. **सोऽस्य निवासः (4-3-89) ॥विधिसूत्रम्॥**

स्रुघ्नो निवासोऽस्य स्रौघ्नः।

1108. **तेन प्रोक्तम् (4-3-101) ॥विधिसूत्रम्॥**

पाणिनिना प्रोक्तं पाणिनीयम्।

1106. **अधिकृत्य इति** -अ धिकृत्यइ तिल यबन्तंप दम्,क् ते,ग्र न्थेइ तिच्छेदः। **द्वितीयान्ताद् अधिकृत्य कृतो ग्रन्थ इत्यर्थेऽण्-प्रत्ययः स्यात्।** अणिति सामान्यप्रत्ययः, अस्य पूर्वोक्ता अपवादाः यथास्थानं प्रवृत्ताः भविष्यन्ति।

रूपसिद्धिः

शारीरकीयः (वेदान्तः) – शारीरकम् (शरीरस्य अयं जीवात्मा, तस्येदम् इत्यण्, शारीर एव शारीरकः स्वार्थे कन्) अधिकृत्य कृतो ग्रन्थ इत्यर्थे शारीरकशब्दात् ''वृद्धिर्यस्याचामादिस्यद् वृद्धम्'' इति सूत्रेण वृद्धसञ्ज्ञायां ''वृद्धाच्छः'' इति सूत्रेण छप्रत्यये, छस्य ईयादेशे, भत्वादकारलोपे, स्वादिकार्ये 'शारीरकीयः' इति रूपं सिद्धम्।

अन्योदाहरणान्यथा –

1. शकुन्तलाम् अधिकृत्य कृतं नाटकं शाकुन्तलम् (अण्) ।
2. सुभद्राम् अधिकृत्य कृतो ग्रन्थः सौभद्रः (अण्) ।
3. भरतान् अधिकृत्य कृतमाख्यानम्, भारतम् (अण्) ।
4. भीमरथम् अधिकृत्य कृताऽऽख्यायिका भैमरथी (अण्, ङीप्) आख्यायिकेति वाच्ये क्वचित् तद्धितप्रत्ययस्य लुप् अपि भवति यथा – वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता।

1107. **सोऽस्येति** – सः, अस्य, निवासः इतिच्छेदः। **प्रथमा समर्थाद् अस्य निवास इत्यर्थे अण् स्यात्।** अणिति सामान्यप्रत्ययः, अस्य पूर्वोक्ता अपवादा यथास्थानं प्रवृत्ता भविष्यन्ति।

रूपसिद्धिः

स्रौघ्नः – स्रुघ्नः (स्रुघ्नदेशः) निवासोऽस्य इत्यर्थे स्रुघ्नशब्दात् ''सोऽस्य निवासः'' इत्यणि, अनुबन्धलोपे, आदिवृद्धौ भत्वादकारलोपे स्वादिकार्ये 'स्रौघ्नः' इति रूपं सिद्धम्। एवमेव मथुरा निवासोऽस्य माथुरः। नदी निवासोऽस्य नादेयः (नद्यादिभ्यो ढक्)। राष्ट्रं निवासोऽस्य राष्ट्रियः (राष्ट्रावारपाराद् घखौ इति घः)। ग्रामो निवासोऽस्य ग्राम्यः ग्रामीणो वा (ग्रामाद् यखञौ)।

1108. **तेन प्रोक्तमिति** – तेन, प्रोक्तम्, इतिच्छेदः। **तृतीयान्तात् 'प्रोक्तम्' इत्यर्थे अण्-प्रत्ययः स्यादित्यर्थः।** प्रोक्तम् = प्रथमप्रकाशितम् = प्रथमव्याख्यातम्। अणिति सामान्यप्रत्ययः। यथावसरमस्यापवादप्रत्ययाः अस्य बाधकाः भवन्ति।

रूपसिद्धिः

पाणिनीयम् – पाणिनिना प्रोक्तं पाणिनीयं व्याकरणम्। पाणिनिशब्दात् ''तेन प्रोक्तम्'' इति सूत्रेण अण् प्रत्यये प्राप्ते, तं प्रबाध्य ''वृद्धाच्छः'' इति छप्रत्यये, छस्य ईयादेशे, पाणिनि ईय इति जाते, भत्वादिकारलोपे, स्वादिकार्ये 'पाणिनीयम्' इति रूपं सिद्धम्।

एवमेव आपिशलिना प्रोक्तम् आपिशलं व्याकरणम्। (इञश्च इत्यण्)। शौनकेन प्रोक्ता शौनकीया शिक्षा (वृद्धाच्छः)। चन्द्रेण प्रोक्तं चान्द्रं व्याकरणम् (तेन प्रोक्तमित्यण्) इत्यादयोऽपि बोद्धव्याः।

1109. तस्येदम् (4-3-120) ॥विधिसूत्रम्॥

उपगोरिदम् औपगवम्।

1109. तस्येदमिति - तस्य, इदम् इतिच्छेद:। **षष्ठीसमर्थाद् 'इदम्' इत्यर्थे अण्-प्रत्यय: स्यादित्यर्थ:।** अणिति सामान्यप्रत्यय:। अणं प्रबाध्य अपवादप्रत्यया यथास्थानं प्रवृत्ता भविष्यन्ति। यथा उपगोरिदम् 'औपगवम्'।

रूपसिद्धि:

औपगवम् - उपगो: इदम् इत्यर्थे उपगुशब्दात् ''तस्येदम्'' इति अण्-प्रत्ययेऽनुबन्धलापे, उपगु अ इति जाते, आदिवृद्धौ, ''ओर्गुण:'' इति भस्य उकारस्य स्थाने ओकारे गुणे, औपगो अ इति जाते, ''एचोऽयवायाव:'' इति ओकारस्य अवादेशे, स्वादिकार्ये 'औपगवम्' इति रूपं सिद्धम्।

एवमेव -

1. भीमस्य इयं भैमी बुद्धि:। (अणन्ताद् भैमशब्दात् ''टिड्ढाणञ्.'' इति ङीप्।) भैम्या: (बुद्ध्या:) व्याख्या भैमीव्याख्या। षष्ठीतत्पुरुषे सामान्याधिकरण्याभावात् पुंवद्भावो न।
2. बृहस्पतेरिदं बार्हस्पत्यं नीतिशास्त्रम् (दित्यदित्यादित्यपत्युत्तरपदाण्य:)
3. अश्वपतेरिदम् आश्वपतं कुलम्। (ण्यं प्रबाध्य अश्वपत्यादिभ्यश्चेत्यण्)
4. देवस्येदं दैव्यं दैवं वा बलम्। (देवाद् यञञौ)।
5. उत्सस्यायम् औत्स: कलकल:। (उत्सादिभ्योऽञ्)।
6. स्त्रिया इदं स्त्रैणं चरितम्। (स्त्रीपुंसाभ्यामिति नञ्)।
7. पुंस इदम् पौंस्नं बलम्। (स्त्रीपुंसाभ्यामिति स्नञ्)।
8. गोरिदं गव्यं पय:। (गोरजादिप्रसङ्गे यत्)।
9. राष्ट्रस्येदं राष्ट्रियं कार्यम्। (राष्ट्रावारपारादिति घ:)।
10. अवारपारस्येदम् अवारपारीणं वस्तु। (राष्ट्रावारपारादिति ख:)
11. नद्या इदं नादेयं जलम्। (नद्यादिभ्यो ढक्)।
12. शास्त्रस्यायं शास्त्रीय: सिद्धान्त:। (वृद्धाच्छ: छस्य ईय्)।
13. मासस्य इदं मासिकं वेतनम्। (कालाट्ठञ्, ठस्येक:)।

अभ्यासः

वस्तुनिष्ठात्मकप्रश्नाः –

1. 'चाक्षुषम्' इत्यत्र प्रत्ययोऽस्ति –

(क) आञ् (ख) अण्

(ग) अक् (घ) अ

2. 'राष्ट्रियः' इत्यत्र प्रत्ययोऽस्ति –

(क) इय् (ख) घ

(ग) य (घ) कोऽपि न

3. 'अमात्यः' इत्यत्र प्रत्ययोऽस्ति –

(क) त्यक् (ख) त्य

(ग) त्यप् (घ) यत्

अतिलघूत्तरात्मकप्रश्नाः –

4. दिव्यम् इत्यत्र केन सूत्रेण कः प्रत्यय?
5. वृद्धिर्यस्याचामादिस्तद् किं सञ्ज्ञं स्यात्?
6. त्यदादिशब्दाः के? लिखत।
7. 'शालीयः' इत्यत्र केन कः प्रत्ययः?
8. गहादिभ्यः कः प्रत्ययः?
9. प्रावृषेण्यः इत्यत्र प्रकृति-प्रत्ययौ कौ?
10. स्रुघ्ने जातः इत्यर्थे केन कः प्रत्ययः?
11. एण्यापवादः कः प्रत्ययः?
12. कोशशब्दात् सम्भूतेऽर्थे कः प्रत्ययः?
13. दिगादिभ्यः कः प्रत्ययः?
14. आध्यात्मिकम् इत्यत्र आञ्-प्रत्ययः केन?
15. पारलौकिकम् इत्यत्र उभयपदवृद्धिः केन?
16. वर्गान्तात् भवार्थे कः प्रत्ययः?
17. औपाध्यायकः इत्यत्र कस्मिन्नर्थे वुञ्-प्रत्ययः?
18. रूप्यप्रत्ययः केभ्यो भवति?

लघूत्तरात्मकप्रश्नाः –

19. हेतु मनुष्येभ्योऽन्यतरस्यां रूप्यः इति सूत्रस्य सोदाहरणं व्याख्या विधेया।
20. शौल्कशालिकः इत्यस्य ससूत्रं सिद्धिः कार्या।
21. अनुशतिकादीनां चेति सूत्रं सोदाहरणं व्याख्यायताम्।
22. सायं चिरमिति सूत्रं प्रपूर्य सोदाहरणं व्याख्यायताम्।
23. कालाट्ठञ् इति सूत्रं सोदाहरणं व्याख्यायताम्।

निबन्धात्मकप्रश्नाः –

24. अधोलिखितानां प्रयोगाणां सिद्धिः कार्या।

श्रावणः, चातुरं (शकटम्), राष्ट्रियः, ग्राम्यः, नादेयम्, दाक्षिणात्यः, प्राच्यम्, तत्रत्य, नित्यः, शालीयः, तदीयः, गहीयः, अस्मदीयः, यौष्माकीणः, आस्माकः, तावकः, मामकीनः, त्वदीयः, मत्पुत्रः, मध्यमः, कालिकम्, सायन्तनम्, प्रावृषेण्यः, स्रुघ्ने जातः स्रौघ्नः, प्रावृषिकः, कौशेयम्, दिश्यम्, दन्त्यम्, आधिदैविकम्, जिह्वामूलीयम्, कवर्गीयम्, समीयम्, देवदत्तमयम्, हैमवती, शारीरकीयः, पाणिनीयम्।

25. अधोलिखितानां सूत्राणां व्याख्या विधेया।

(1) राष्ट्रावारपाराद् घखौ। (2) प्रत्ययोत्तरपदयोश्च। (3) शरीरावयवाच्च। (4) ठगायस्थानेभ्यः। (5) द्युप्रागपागुदक्प्रतीचो यत्। (6) ग्रामाद्यखञौ। (7) युष्मदस्मदोरन्यतरस्यां खञ् च। (8) सम्भूते। (9) विद्यायोनिसम्बन्धेभ्यो वुञ्। (10) त्यब्नेर्ध्रुव इति वक्तव्यम्।

26. प्रकरणस्थसूत्राणां वार्तिकानाञ्च निम्नप्रारूपानुसारं सारणी कर्त्तव्या।

सूत्रम्/वार्तिकम्	सूत्रार्थः/वार्तिकार्थः	उदाहरणम्

इति शैषिकाः।